# Rudraganakrita Shiva Stuti

# रुद्रगणकृता शिवस्तुतिः

## Document Information

Text title : Rudraganakrita Shiva Stuti

File name : shivastutiHrudragaNakRRitA.itx

Category : shiva, shivarahasya, stuti

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | mAheshvarAkhyaH prathamAMshaH | adhyAyaH 31 - prAkAravarNane rudragaNArchanam | vAvRittashlokAH ||

Latest update : December 17, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 17, 2023

*sanskritdocuments.org*

# रुद्रगणकृता शिवस्तुतिः

स्कन्दः -
मणिरुद्रेश्वरं नाम्ना चिन्तामणिगणक्षये ।
प्रोद्यत्कुम्भैकवसता पूजितं तं गणेश्वरैः ॥ १२॥

संस्तुतं परया भक्त्या चान्तिरिक्षे गणैस्तदा ॥ १३॥

रुद्राः -
संसारतापजमहारुजमाशु चेश सद्यो विनाशय महेश्वर चारुदृष्ट्या ।
रुद्रो भवान् श्रुतिशिखामलगीतकीर्ते पाहीश वेदवचनैर्भिषजां त्वमीशः ॥ १४॥

स्कन्दः -
एवं स्तुवन्ति तं देवं मणिभद्रेश्वरं गणाः ।
तद्दक्षिणेऽपि प्राकारं मुक्तारत्नविनिर्मितम् ॥ १५॥

तन्मध्यगोपुरवरं मणिमाणिक्यनिर्मितम् ।
महामणिशिखाकीलकलितं शेखरान्वितं ॥ १६॥

रुद्रावतारचरितैर्वृषभैश्चसमन्वितम् ।
एकादशसहस्रं वै तोमरासिवरायुधाः ॥ १७॥

महाबलामहोत्साहा दिव्यास्तत्र गणाश्शुभाः ।
जटामुकुटशोभाढ्यास्तारानाथकलाधराः ॥ १८॥

शिवाज्ञाकारिणस्सर्वे यौवनोन्मत्तविग्रहाः ।
तत्र सम्पूजयन्त्येव दिव्यरुद्रेश्वरं हि ते ॥ १९॥

मणिधाम्नि महालिङ्गं सम्पूज्य स्तुवन्तीश्वरम् ॥ २०॥

रुद्रगणाः -
दिव्येश्वर त्रिदशवर्गजजातदुःखसन्तापवृन्दपुरनाशन ते विनीतम् ।
देवेश ते वरदयारसपात्रमीश त्वस्मान्त्सदाशिव सदैव सुरक्षतान्नः ॥ २१॥

स्कन्दः -
एवं स्तुवन्ति ते रुद्रा दिव्यरुद्रेश्वरं तदा ।
गोपुरं तच्च प्राकारं रक्षन्ति सततं गणाः ॥ २२॥

तत्पश्चान्मणिसङ्क्लृप्तप्राकारं मणिगोपुरम् ।
रुद्रावतारचरितैर्ललामवृषशेखरैः ॥ २३॥

रौम्या नाम गणश्रेष्ठा मत्तमातङ्गविक्रमाः ।
तत्र ते पूजयन्त्येव रौम्येशं मणिधामगम् ॥ २७॥

पूजयन्ति स्तुवन्त्येव रौम्यानाम गणाश्शिवम् ॥ २८॥

रौम्याः -
त्वद्रोमजातविधयो हरविष्णुसङ्घा रक्षन्ति देव जगतां स्थितिनाशकेऽपि ।
त्वत्पादपङ्कजरजश्शिरसा वहन्तः पाहीश नोऽद्य कृपया सरसार्द्रदृष्ट्या ॥ २९॥

स्कन्दः -
इत्थं स्तुवन्तिते रौम्या महेशं भक्तिभाविताः ।
उत्तरे भौमकानाम गणाश्शम्भोर्महात्मनः ॥ ३०॥

शिवाज्ञाकारिणो भौमा बलवीर्यपराक्रमाः ।
ततोत्तरे च प्राकारे मणिसालोज्वलप्रभे ॥ ३४॥

तन्मध्यगोपुरे चापि रुद्रक्रीडावृषैर्युते ।
मणिराजन्महाकुम्भे रञ्जिते भानुप्रभे ॥ ३५॥

तिष्ठन्ति ते च रक्षन्ति प्राकारं तच्च गोपुरम् ।
तैश्च भौमेश्वरं नाम्ना मणिधामगतोऽर्चितः ॥ ३६॥

संस्तुतः परयाभक्त्यालिङ्गसंस्थोमहेश्वरः ॥ ३७॥

भौमाः-
भौमेश भीमरथतङ्गरथाङ्गदाने सम्मोदितो हरिहराम्बुजलोचनेन ।
भूमातिगाखिलगते परिपाहि सोमधामोत्तमाङ्ग ललनाञ्चितचारुदेह ॥ ३८॥

स्कन्दः-
इति स्तुवन्ति ते भौमा महादेवं घृणानिधिम् ।
विंशत्सहस्रं परितः प्राकारमणिगोपुरैः ॥ ३९॥

॥ इति शिवरहस्यान्तर्गते माहेश्वराख्ये रुद्रगणकृता शिवस्तुतिः ॥

- ॥ श्रीशिवरहस्यम् । माहेश्वराख्यः प्रथमांशः । अध्यायः ३१ - प्राकारवर्णने रुद्रगणार्चनम् । वावृत्तश्लोकाः ॥

- .. shrIshivarahasyam . mAheshvarAkhyaH prathamAMshaH . adhyAyaH 31 - prAkAravarNane rudragaNArchanam . vAvRRittashlokAH ..

Notes:

Skanda स्कन्द outlines the eulogies to Śiva शिव, recited by the multitudes of Rudragaṇa-s रुद्रगणाः who guard and serve Śiva शिव at Mount Kailāsa कैलास शैल; and worship the respective Śivaliṅga-s शिवलिङ्ग at their residences in the four cardinal directions around the Peak of Mount Kailāsa कैलास मौलि (viz. Cintāmaṇigaṇāḥ चिन्तामणिगणाः in the East worship Maṇibhadreśvaram मणिभद्रेश्वरम्, Rudrāḥ रुद्राः in the South worship Divyarudreśvaram दिव्यरुद्रेश्वरम्, Raumyāḥ रौम्याः in the West worship Raumyeśam रौम्येशम्, Bhaumaka भौमक in the North worship Bhaumeśvaram भौमेश्वरम्) being ever-ready to execute the commands of Śiva शिव (Śivājñā शिवाज्ञा).

Encoded and proofread by Ruma Dewan

---

*Rudraganakrita Shiva Stuti*

pdf was typeset on December 17, 2023

Please send corrections to *sanskrit@cheerful.com*